# रसवदाद्यलङ्कारः

**HEMARAJA. N. S, Research assistant, Karnataka Sanskrit University, Pampamahakavi Road, Chamarajapete, BangaLore-18, Mail: <mailto:monihemu85@gmail.com>, Phone-8310719147**

- **पीठिका**

**द्वे वर्त्मनी गिरां देव्याः शास्त्रं च कविकर्म च ।**

**प्रज्ञोपज्ञं तयोराद्यं प्रतिभोद्भवमन्तिमम् ॥**[1]

पूर्वोक्तोक्तिवत् सरस्वत्याः प्रत्यक्षे मार्गद्वये प्रतिभोद्भवं काव्यमपि अन्यतमम् । 'कवेः कर्म काव्यम्' इति निष्पन्नं काव्यपदं काव्यानां महासमुद्रमेव प्रतिनिधत्ते । प्रतिभावान् कविरेव काव्यसाम्राज्यस्य चक्रवर्ती । तदुच्यते -

**अपारे काव्यसंसारे कविरेकः प्रजापतिः ।**

**यथास्मै रोचते विश्वं तथेदं परिवर्तते ॥**[2]

एवं नवनवोन्मेषशालिन्या प्रज्ञया प्रतिभया च प्रभासमानस्य कवेः समृद्धकाव्यगुणभूयिष्ठं काव्यसाहित्यं साहित्यरसिकानां हृदयानि नितान्तं रञ्जयति ।

- **काव्यप्रभेदाः**

काव्येषु प्रधानतया भेदद्वयं वर्तते दृश्यकाव्यं श्रव्यकाव्यं चेति । तत्र द्रष्टुं योग्यं काव्यं दृश्यं काव्यम् इत्युच्यते । दृश्यकाव्ये दशरूपकाणि अष्टादश उपरूपकाणि च अन्तर्भवन्ति । दृश्यकाव्यगतानि रूपकाणि तु **नाटकं, प्रकरणं, भाणः, व्यायोगः, समवकारः, डिमः, ईहामृगः, अङ्कः, वीथी, प्रहसनम्** [3]इति दशधा भिद्यन्ते ।

उपरूपकाणि तु नाटिका, **त्रोटकं, गोष्ठी, सट्टकं, नाट्यरासकं, प्रस्थानम्, उल्लाप्यं, काव्यं, प्रेङ्खणं, रासकं, संलापकं, श्रीगदितं, शिल्पकं, विलासिका, दुर्मल्लिका, प्रकरणी, हल्लीशः, भाणिका** [4]इति अष्टादशधा विभक्तानि । एवं दृश्यकाव्येषु प्रभेदाः भवन्ति ।

श्रोतुं योग्यं काव्यं श्रव्यं काव्यं भवति । श्रव्यकाव्यमपि पुनः त्रिविधं भवति गद्यकाव्यं, पद्यकाव्यं चम्पूकाव्यं चेति **। 'वृत्तगन्धोज्झितं गद्यम्'** [5] इति विश्वनाथस्य अभिप्रायः । वृत्तस्य छन्दसः गन्धेन लवेनापि रहितं गद्यम् इति स्पष्टीभवति ।**'अपादः पदसन्तानः गद्यमित्यभिधीयते'** इत्यनेनापि गद्यस्य लक्षणं निरुच्यते ।

---

[1] काव्यप्रकाशः

[2] काव्यप्रकाश

[3] दशरूपकम्

[4] दशरूपकम्

[5] साहित्यदर्पणः

’ **छन्दोबद्धपदं पद्यम्**’ इत्यनेन शास्त्रप्रसिद्धलक्षणयुतेन छन्दसा नियन्त्रितं पद्यम् इति अवगम्यते । **’गद्यपद्यमयं काव्यं चम्पूरित्यभिधीयते**’ [6] इत्युक्तिः गद्यपद्योभयात्मकं काव्यं चम्पूः इति निश्चिनोति । एवं श्रव्यकाव्ये अपि नाना प्रकाराः निरूप्यन्ते साहित्यमीमांसकैः ।

अस्मिन् पद्यकाव्यप्रकारे स्तोत्रसाहित्यम् अपि अन्तर्गतं विद्यते । संस्कृते स्तोत्रसाहित्यं महत् बृहत् च सत् नानाविषयनिरूपकं जनमानसाह्लादकारि च वर्तते इति पण्डिताः आमनन्ति ।

- **काव्यप्रयोजनम्**

आनन्दः एव काव्यस्य प्रमुखं प्रयोजनम् इत्यस्मिन् विषये आलङ्कारिकाणाम् एकाभिप्रायः वर्तते । भामहः काव्यप्रयोजनम् एवं निर्वक्ति -

**धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च ।**

**प्रीतिं करोति कीर्तिं च साधुकाव्यनिबन्धनम् ॥**

भरतमुनेः नाट्यशास्त्रे **’क्रीडनीयकमिच्छामो दृश्यं श्रव्यं च यद्भवेत्**’ [7]इत्युक्तम् । **काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये सद्यःपरनिर्वृतये कान्तासंमिततयोपदेशयुजे** [8] इत्यादिवाक्यानि काव्यप्रयोजनानि निश्चप्रचं निगदन्ति ।

- **रसवदाद्यलङ्कारस्य औचित्यम्**

महदिदं संस्कृतवाङ्मयम् । तत्र काव्यानि सन्ति भूयांसि । तथैव काव्यैः चतुर्वर्गफलप्राप्तिरपि भविता । मानवः काव्यरसास्वादनेन विना जीवितुं न शक्नोति । अतः काव्यं जीवनस्य जीवातुभूतमेव । अतः काव्यस्वरूपनिरूपकाः अलङ्कारशास्त्रग्रन्थाः प्रायशः आदौ काव्यप्रयोजनानि एव परिशीलयन्ति ।

तदनु काव्यहेतुः काव्यस्वरूपं च लक्ष्यीक्रियन्ते । काव्यं नाम शब्दार्थयोः युगलम् इति हेतोः तेषु ग्रन्थेषु शब्दविधाः, अर्थविधाः,अभिधादिशब्दव्यापारः,काव्यस्य आत्मा, काव्यविधाः च प्रतिपाद्यन्ते । गुणाः रीतयः दोषाः च विविच्यन्ते । काव्यस्य आत्मभूतस्य रसस्य विषयः विस्तरतया लक्षणग्रन्थेषु प्रतिपाद्यन्ते ।

भरतमुनिविरचितं **’नाट्यशास्त्रम्**’ एव रससिद्धान्तप्रतिपादकेषु ग्रन्थेषु प्राचीनतमः ग्रन्थः । इदानीम् उपलब्धस्य नाट्यशास्त्रस्य संस्करणं क्रिस्ताब्दे द्वितीये शताब्दे विरचितं स्यात् इति ऊह्यते । अस्मिन् लघुतरे संस्करणे अपि समस्तमौलिकनां रसादीनां नाट्याङ्गानां विवेचनं वर्तते । भरतस्य सूत्रेषु साङ्गोपाङ्गं सोदाहरणं च रसप्रतिपादनं दृश्यते इति हेतोः भरतमुनेः प्रागेव शिष्यप्रशिष्यपरम्परायां रससिद्धान्तः प्रचारे आसीत् इति ज्ञायते । पूर्वाचार्यैः लक्षणरूपेण प्रतिपादितं रससिद्धान्तं पुष्टीकर्तुं भरतमुनिः परम्परागतविषयैः एव यथोचितं

---

[6] काव्यप्रकाशः
[7] नाट्यशास्त्रम्
[8] साहित्यदर्पणः

स्वीचकार इति अभिनवगुप्तः वदति । यथा **’ता एतां ह्यार्या एकप्रघट्टकतया पूर्वाचार्यैर्लक्षणत्वेन पठितः** । मुनिना तु सुखसङ्ग्रहाय यथास्थानं निवेशिताः’ इति ।

क्रिस्तशक षष्टे शतके विद्यमानः भामहात् आरभ्य इदानिन्तनपर्यन्तम् ये ये अलङ्कारिकाः आसन्, ते सर्वे प्रायः रसवदाद्यलङ्करान् आहुः । परन्तु तेषां रसवदालङ्काराणां संख्या स्वरूपविषये मतभेदाः वर्तन्ते । नवमशतकीयात् आनन्दवर्धनात् अर्वाचीनेषु आलङ्कारिकेषु रसवदाद्यलङ्काराणां संख्या विषये मतैक्यं दृश्यते । षष्टशतकस्य मध्यकालिकः काव्यालङ्कारख्यस्य अलङ्कारशास्त्रग्रन्थस्य प्रणेता भामहः **“रसवत्प्रेय ऊर्जस्वि समाहितञ्चेति चतुरः”**[9] रसवदाद्यलङ्कारान् प्राह । अयं च भामहः प्रेयोलङ्कारं वस्तुतः सलक्षणं न ब्रूते । परन्तु

**प्रेयो गृहागतम् कृष्णं अवादीत् विदुरो यथा :-**

**अद्य या मम गोविन्द ! जाता त्वयि गृहागते ।**

**काले नैषा भवेत् प्रीतिः तवैवागमनात् पुनः ॥**[10]

इति भामहः प्रेयसः लक्ष्यं आह । अस्य लक्ष्यस्य परिशीलनेन विदुरनिष्ठः कृष्णविषयकः रतिभावः ध्वन्यतेति अर्वाचीनाः आलङ्कारिकाः आमनन्ति । सप्तमशतकस्य आदिभागे विद्यमानः काव्यादर्शकारः दण्डी प्रेयसः आलङ्कारस्य **प्रेयः प्रियतराख्यानं**[11] इति लक्षणं निगद्य, **अद्य या मम गोविन्द ! जाता त्वयि गृहागते**[12] इतीमं श्लोकं उदाजहार । दण्डीभामहयोः मते प्रेयोलङ्कारस्य स्वरूपं अभिन्नमेव आनन्दवर्धनात् अर्वाचीनाः दण्डीभामहयोः प्रेयोलङ्कारम् भावध्वनिं अङ्गीकृत्य प्रेयसः लक्षणं अन्यथा निरूपयन्ति । नवमशतकस्य आदौ जीवितः काव्यालङ्कारसारसंग्रहः इत्याख्यस्य ग्रन्थस्य प्रणेता उद्भटः **रसादीनां भावानां अनुभवादी सूचनैः**[13] इति भावस्वरूपं आचक्षाणः एकस्मिन् भावे अपरश्च भावस्य अङ्गे सति सः भावः प्रेयोलङ्कारः भवति इति आह । इदं उद्भटस्य प्रेयसः लक्षणस्य संवादी दृष्यते । **रसवद्दर्शितस्पष्टश्रृङ्गारादि रसं** [14]इति रसवतः लक्षणं निरूप्य **देवी समागमात् धर्ममस्करिणि अतिरोहिता** [15]इति भामहः लक्षयञ्च निजगाद । रसवत् रसपेशलम् इति दण्डी रसवदलङ्कारस्य लक्षणं उक्त्वा

**मृतेति प्रेत्य सङ्गन्तुम् यथा मे मरणं मतं ।**

**सैवा अवन्ती मया लब्ध्वा कथं अत्रैव जन्मनि ॥**[16]

इति उदाहरणं च प्राह । स्फुटप्रतीयमानाः रसाः एव रसवदलङ्काराः भवन्ति इति दण्डिभामहयोः आशयः वर्तते इति तयोः लक्ष्य लक्षण परिशीलनेन न स्फूटी भवति । स्फुटप्रतीयमानेभ्यः रसेभ्यः रसवत् अलङ्कारः विभिन्नः

---

[9] काव्यालङ्कारः
[10] काव्यालङ्कारः
[11] काव्यादर्शः
[12] काव्यादर्शः
[13] काव्यालङ्कारसारसङ्ग्रहः
[14] काव्यालङ्कारः
[15] काव्यालङ्कारः
[16] काव्यादर्शः

इति आनन्दवर्धनात् अर्वाचीनाः अङ्गीकुर्वते । उर्जस्व्यलङ्कृतेः लक्षणम् अनुक्त्वा **कर्णेन पार्थाय पुनरागतः द्विसन्दधाति किं कर्णः शल्य!** [17]इति अहिः उपाकृतः इति भामहः ऊर्जस्विनः केवलं लक्ष्यमाह । काव्यादर्शे दण्डी पुनः युक्तोत्कर्षं रूढालङ्कारं ऊर्जस्वि इति ऊर्जस्विनः लक्षणं आचक्षाणः **अपकर्ता अहं अस्मि इति रुदिते मास्मभूत् भयं**[18] इत्यादि श्लोकं लक्षीचकार । यत्र वाक्यार्थे परिपूर्णस्वरूपः अहङ्कारः प्रतीयते सः ऊर्जस्वी इति दण्डी भामहयोः एकाभिप्रायः विद्यते । काव्यालङ्कार सारसंग्रहाख्यस्य ग्रन्थकारः **उद्भटः कामक्रोधादि कारणात् अनौचित्यं प्रवृत्तानां भावानां अनौचित्यं प्रवृत्तानां रसानां च बन्धः ऊर्जस्व्यलङ्कारः** [19] भवति इति आचष्टे । इदं ऊर्जस्विस्वरूपं उद्भटात् अर्वाचीनाः मम्मट विश्वनाथाप्पय्यदीक्षितजगन्नाथादयः अर्वाचीनाः सर्वे अङ्गीचक्रुः । **क्षत्रिययोषितां रामप्रसक्तौ यान्तीनां पुरः अदृश्यत नारदः** [20]इति केवलं लक्ष्यं वदन् समाहितमिति चतुर्थं अन्तिमं समाहितं अलङ्कारं आह । भामहानुसारी दण्डीतु **किञ्चिदारभमाणस्य कार्यं दैववशाद्पुनः**[21] इत्यादि लक्षणं उक्त्वा **मानमस्याः निराकर्तुं पादयोमे पतिष्यतः** [22] इत्याद्युदाहरणञ्च प्राह । **आरब्धस्य कार्यस्य दैववशाद् साधनान्तरोपलब्ध्यासौकर्येण समाधानं समाहितालङ्कारमिति**[23] दण्डिनः आशयः । भामहस्य च लक्ष्ये परिशील्यमाने तस्याभिप्रायोऽपि दण्डिनः संवादी भासते । अर्वाचीनाः इमं समाहितं अलङ्कारं स्वीये समाध्यलङ्कारे अन्तर्भावयन्ति । नवमशतकस्य मध्यकालिकः आनन्दवर्धनः स्वकीये ध्वन्यालोके :-

**प्रधाने अन्यत्र वाक्यार्थे यत्राङ्गन्तुं रसादयः ।**

**काव्ये तस्मिन् अलङ्कारिः रसादिरिते मे मतिः ॥**[24]

इति वदन् असंलक्ष्यक्रमव्यङ्ग्यध्वनयः रसः, भावः, रसाभासः, भावाभासः, भावोदयः, भावसन्धिः, भावशबलता, भावशान्तिश्चेति तेनैव समर्थिताः वर्तन्ते । ते एव इतराङ्गत्वं आपन्नाः रसाद्यलङ्कार भाजः भवन्ति इति आह । परन्तु सोदाहरणं तान् प्रभेदान् न स्फुटीचकार । असंलक्ष्यक्रमव्यङ्ग्येभ्यः रसभावादिभ्यः रसवदाद्यलङ्कारः विभिन्नाः इति इदं प्रथमतः आनन्दवर्धनः अवादीत् । एकादाशशतकस्य अन्तिमभागे जातः काव्यप्रकाशकारः स्वकीये काव्यप्रकाशे रसवदाद्यलङ्कारस्य स्वरूपं सोदाहरणं स्फूटीचकार । तद्यथा ध्वन्यमानः रसः इतराङ्गत्वं आपद्यते सः रसवदलङ्कारः देवादि विषयरतिः उत निर्वेदग्लानि शङ्कादि त्रयस्त्रिंशत् व्यभिचारि भावाः प्रधानव्यङ्ग्याः भवन्ति तदा ते ध्वनयः इति कथ्यन्ते । ते भावाः एव इतरवाक्यार्थस्य अङ्गत्वं यदि आप्नुवन्ति । तदा ते भावाः प्रेयोलङ्काराः इति कथ्यन्ते । असंलक्षितक्रमव्यङ्ग्यध्वनयः रसाभासः, भावभासाश्च इतरवाक्यार्थस्य यदा अङ्गभूताः भवन्ति तदा ऊर्जस्विनामानः अलंकृतयः सम्पद्यन्ते ध्वन्यमाना भावशान्तिः यदि इतराङ्गत्वं आपद्यते सा भावशान्तिः समाहितं इति अलङ्कृतिः भवति । असंलक्षितक्रमव्यङ्ग्याः भावोदयभावसन्धिभावशबलताः इतराङ्गत्वं समापन्नाः तत्तदाख्यालङ्काराः भवन्ति ।

[17] काव्यालङ्कारः
[18] काव्यादर्शः
[19] काव्यालङ्कारसारसङ्ग्रहः
[20] काव्यालङ्कारसारसङ्ग्रहः
[21] काव्यादर्शः
[22] काव्यादर्शः
[23] काव्यादर्शः
[24] ध्वन्यालोकः

एवं सप्त रसवदलङ्कारान् सोदाहरणं निजगाद । इमान् रसवदाद्यलङ्कारान् शब्दे अर्थे च अलङ्कारे अयम् काव्यप्रकाशकारः न परिगणयामास । द्वादशशतकस्तः अलङ्कारसर्वस्वकारः रुय्यकः मम्मटोक्तान् सप्त रसवदलङ्कारान् अङ्गीकृत्य ते सर्वे अर्थालङ्काराः भवन्ति इति वदन् सोदाहरणां विशदीचकार । रसः, भावः, तदाभास तत्प्रशमानां निबन्धनेन रसवत्प्रेय ऊर्जस्वी समाहिताख्याः भावोदयः, भावसन्धिः, भावशबलताश्च उपनिबन्धनेन तत्तदाख्याश्च उपनिबन्धेन तत्तदाख्याश्च अलङ्कृतयः भवन्ति इति रुय्यकः बभाण । रुय्यकात् अर्वाचीनाः कविराजविश्वनाथधनञ्जयजयदेवाप्पय्यदीक्षितजगन्नाथादयः ये ये अलङ्कारशास्त्रदिपन्डितकेसरिणः अवर्तन्त ते सर्वे स्व स्व मतिविभावानुसारं पूर्वोक्तान् सप्त रसवदलङ्कारान् सोदाहरणं सलक्षणं स्फूटीचक्रुः ।

एवं रसवदलङ्काराणां विषये केषाञ्चन आलङ्कारिकाणां विप्रतिपत्तिः अस्ति चेदपि केषाञ्चन आलङ्कारिकाणां रसवदाद्यलङ्कार ़विषये मतैक्यं दृष्यते ।अभिप्रायः विद्यते ।

इति शम्

*******************

## आकरग्रन्थाः


१. ध्वन्यालोकः आनन्दवर्धनः, चौकम्बा पब्लिकेशन्स्, वाराणसी, १९८०
२. साहित्यदर्पणः, विश्वनाथः, चौकम्बा पब्लिकेशन्स्, वाराणसी, १९७५
३. काव्यप्रकाशः, मम्मटःचौकम्बा पब्लिकेशन्स्, वाराणसी,२०००
४. संस्कृतसाहित्यम्, कृष्णमूर्तिः, प्रसाराङ्गम्, मय्सूरु विश्विविद्यालयः, मय्सूरु १९९०।
५. काव्यालङ्कार सार सङ्ग्रहः, चौकम्बा पब्लिकेशन्स्, वाराणसी, १९८०
६. काव्यालङ्कारः, चौकम्बा पब्लिकेशन्स्, वाराणसी, १९६५
७. काव्यादर्शः, चौकम्बा पब्लिकेशन्स्, वाराणसी, १९७२
८. कव्यप्रकाशः, चौकम्बा पब्लिकेशन्स्, वाराणसी, १९८३